॥ अथतर्कसंग्रहप्रारंभः ॥

श्रीगणेशायनमः ॥ निधायहृदिविश्वेशंविधायगुरुवंदनम् ॥ बालानांसुखबोधायक्रियतेतर्कसंग्रहः ॥ १ ॥ द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाःसप्तपदार्थाः तत्रद्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसिनवैव रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानिपंचकर्माणि परमपरंचेतिद्विविधंसामान्यम् नित्यद्रव्यवृत्तयोविशेषास्त्वनंताएव समवायस्त्वेकएव अभावश्चतुर्विधः प्रागभावःप्रध्वंसाभावोत्यंताभावोन्योन्याभावश्चेति गंधवतीपृथिवी साद्विधा नित्याऽनित्याच नित्यापरिमाणुरूपा अनित्याकार्यरूपा पुनस्त्रिविधा शरीरेंद्रियविषयभेदात् शरीरमस्मदादीनाम् इंद्रियंगंधग्राहकंघ्राणं नासाग्रवर्ति विषयोमृत्पाषाणादिः शीत

स्पर्शवत्यआपः ताश्चद्विविधाः नित्याअनित्याश्च नित्याःपरमाणुरूपाः अनित्याःकार्यरूपाः पुनस्त्रिविधाः शरीरेंद्रियविषयभेदात् शरीरंवरुणलोके इंद्रियंरसग्राहकंरसनम् जिह्वाग्रवर्ति विषयःसरित्समुद्रादिः उष्णस्पर्शवत्तेजः तच्चद्विविधं नित्यमनित्यंच नित्यंपरमाणुरूपम् अनित्यंकार्यरूपं पुनस्त्रिविधम् शरीरेंद्रियविषयभेदात् शरीरमादित्यलोके इंद्रियंरूपग्राहकंचक्षुः कृष्णताराग्रवर्ति विषयश्चतुर्विधः भौम दिव्योदर्याकरजभेदात् भौमंवन्ह्यादिकं अबिंधनंदिव्यं वैद्युतादि भुक्तान्नपरिणामहेतुरौदर्यम् आकरजंसुवर्णादि रूपरहितःस्पर्शवान्वायुः सद्विधः नित्योऽनित्यश्च नित्यःपरिमाणुरूपः अनित्यःकार्यरूपः पुनस्त्रिविधः शरीरेंद्रियविषयभेदात् शरीरंवायुलोके इंद्रियंस्पर्शग्राहकंत्वक् सर्वशरीरवर्ति विषयोवृक्षादिकंपहेतुः शरीरान्तःसंचारीवायुःप्राणः स एकोप्युपाधिभेदात्

प्राणापानादिसंज्ञांलभते शब्दगुणमाकाशम् तच्चैकंविभुनित्यंच अतीतादिव्यवहारहेतुः कालः सएकोविभुर्नित्यश्च प्राच्यादिव्यवहारहेतुर्दिक् साचैकानित्याविभ्वीच ज्ञानाधिक रणमात्मा सद्विधः परमात्माजीवात्माचेति तत्रेश्वरःसर्वज्ञः परमात्माएकएव जीवःप्रति शरीरंभिन्नोविभुर्नित्यश्च सुखाद्युपलब्धिसाधनमिंद्रियंमनः तच्चप्रत्यात्मनियतत्वादनंत मणुरूपंनित्यंच चक्षुर्मात्रग्राह्योगुणोरूपं तच्चशुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधम् पृथिवीजलतेजोवृत्ति तत्रपृथिव्यांसप्तविधं अभास्वरंशुक्लंजले शुक्लंभास्वरं तेजसि रसनग्राह्योगुणोरसः सचमधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधः पृथिवीज लवृत्तिः पृथिव्यांषट्विधः जलेमधुरएव घ्राणग्राह्योगुणोगंधः सद्विधः सुरभिरसुरभिश्च पृथ्वीमात्रवृत्तिः त्वगिंद्रियमात्रग्राह्योगुणःस्पर्शः सचत्रिविधः शीतलोष्णानुष्णाशीतभेदात्

त् पृथिव्यप्तेजोवायुवृत्तिः तत्रशीतोजले उष्णस्तेजसि अनुष्णाशीतः पृथिवीवाय्वोःरूपा-
दिचतुष्टयंपृथिव्यांपाकजमनित्यंच अन्यत्रापाकजंनित्यमनित्यंच नित्यगतंनित्यं अनित्य-
गतमनित्यम् एकत्वादिव्यवहारहेतुःसंख्यानवद्रव्यवृत्तिःएकत्वादिपरार्द्धपर्यंता एकत्वंनित्य
गतंनित्यं अनित्यगतमनित्यम् द्वित्वादिकंसर्वत्रानित्यमेव मानव्यवहारसाधारणंकारणपरि
माणम् सर्वद्रव्यवृत्ति तच्चतुर्विधं अणुमहद्दीर्घह्रस्वंचेति पृथग्व्यवहारकारणंपृथक्त्वं सर्व
द्रव्यवृत्ति संयुक्तव्यवहारकारणंसंयोगः सर्वद्रव्यवृत्तिः संयोगनाशकोगुणोविभागःसर्व-
द्रव्यवृत्तिः परापरव्यवहारकारणेपरत्वापरत्वेच तेचद्विविधे दिक्कृतेकालकृतेचेति दूरस्थे
दिक्कृतंपरत्वं समीपस्थेदिक्कृतमपरत्वंच जेष्ठेकालकृतंपरत्वम् कनिष्ठेकालकृतमपरत्वं आ
द्यपतनासमवायिकारणंगुरुत्वं पृथिवीजलवृत्ति स्यंदनासमवायिकारणंद्रवत्वं पृथिव्यप्ते-

जोवृत्ति तद्द्विविधं सांसिद्धिकंनैमित्तिकंचेति सांसिद्धिकंजले नैमित्तिकंपृथिवीतेजसोः पृथि
व्यांलाक्षादावग्निसंयोगजद्रवत्वं तेजसिस्कवर्णादौचूर्णादिपिंडीभावहेतुर्गुणः स्नेहःजल-
मात्रवृत्तिः श्रोत्रग्राह्योगुणःशब्दःआकाशमात्रवृत्तिः सद्विविधः ध्वन्यात्मकोवर्णात्मकश्चेति
ध्वन्यात्मकोभार्यादौवर्णात्मकःसंस्कृतभाषारूपः सर्वव्यवहारहेतुर्ज्ञानंबुद्धिः साद्विधा स्मृ
तिरनुभवश्च संस्कारजन्यंज्ञानंस्मृतिः तद्भिन्नंज्ञानमनुभावः सद्विधः यथार्थोऽयथार्थश्च
तद्वतितत्प्रकारकानुभावोयथार्थः सेवप्रमेत्युच्यते तदभाववतितत्प्रकारकश्चायथार्थः यथाशु
क्ताविदंरजतमिति यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात् तत्कर-
णमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात् असाधारणंकारणं करणं अनन्यथा
सिद्धकार्यनियतपूर्ववृत्तित्वंकारणं कार्यंप्रागभावप्रतियोगि कारणंत्रिविधं समवाय्यसम

वायिनिमित्तभेदात् यत्समवेतंकार्यमुत्पद्यतेतत्समवायिकारणं यथातंतवःपटस्य पटश्च
स्वगतरूपादेः कार्येणकारणेनवासहैकस्मिन्नर्थे समवेतत्वेसतिकारणं असमवायिकारणं
यथातंतुसंयोगःपटस्य तंतुरूपंपटरूपस्य तदुभयभिन्नंकारणं निमित्तकारणं यथातु
रीवेमादिकं पटस्य तदेतत्त्रिविधकारणमध्येयदसाधरणं तदेवकरणं तत्रप्रत्यक्षज्ञानक
रणंप्रत्यक्षं इंद्रियार्थसन्निकर्षजन्यंज्ञानंप्रत्यक्षं तद्विविधं निर्विकल्पकंसविकल्पकंचेति त-
त्रनिष्प्रकारकंज्ञानंनिर्विकल्पकं सप्रकारकंज्ञानंसविकल्पकम् यथाडित्थोयंब्राह्मणोयंश्या
मोयमिति प्रत्यक्षज्ञानहेतुरिंद्रियार्थसन्निकर्षःषड्विधः संयोगः संयुक्तसमवायः संयुक्तस
मवेतसमवायः समवायः समवेतसमवायोविशेषणविशेष्यभावश्चेति चक्षुषाघटप्रत्यक्ष-
जननेसंयोगःसंन्निकर्षः१ घटरूपप्रत्यक्षेसंयुक्तसमवायः चक्षुःसंयुक्तेघटेरूपस्यसमवा-

याात् २ रूपत्वसामान्यप्रत्यक्षेसंयुक्तसमवेतसमवायः चक्षुःसंयुक्तेघटेरूपंसमवेतं तत्ररूपत्व
स्यसमवायात् श्रोत्रेणशब्दसाक्षात्कारेसमवायःसन्निकर्षः कर्णविवरवृत्त्याऽऽकाशस्य
श्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्चसमवायात् शब्दत्वसाक्षात्कारेसमवे
तसमवायःसन्निकर्षः श्रोत्रसमवेतशब्देशब्दत्वस्यसमवायात् अभावप्रत्यक्षेविशेषणवि
शेष्यभावःसन्निकर्षः घटाभाववद्भूतलमित्यत्रचक्षुःसंयुक्तेभूतलेघटाभावस्यविशेषणत्वा
त्त्व एवंसन्निकर्षषट्कजन्यंज्ञानंप्रत्यक्षं तत्करणमिंद्रियंप्रत्यक्षप्रमाणमितिसिद्धम् अनुमि-
तिकरणमनुमानं परामर्शजन्यंज्ञानमनुमितिः व्याप्तिविशिष्टपक्षधर्मताज्ञानंपरामर्शः य-
थावन्हिव्याप्यधूमवान्पर्वतइति तज्जन्यंपर्वतोवन्हिमानिति ज्ञानमनुमितिः यत्रयत्र
धूमस्तत्राग्निरितिसाहचर्यनियमोव्याप्तिः व्याप्यस्यपर्वतादिवृत्तित्वंपक्षधर्मता अनुमानं

द्विविधं स्वार्थंपरार्थंच स्वार्थंस्वार्थानुमितिहेतुः तथाहि स्वयमेवभूयोदर्शनेनयत्रधूमस्त
त्राग्निरिति महानसादौव्याप्तिंगृहीत्वापर्वतसमीपंगतस्तद्गतेचाग्नौसंदिहानः पर्वतेधूमंपश्यन्
व्याप्तिंस्मरति यत्रयत्रधूमस्तत्राग्निरिति तदनंतरंवन्हिव्याप्यधूमवान्अयंपर्वतइति ज्ञान
मुत्पद्यते अयमेवलिंगपरामर्श इत्युच्यते तस्मात्पर्वतोवन्हिमानिति ज्ञानमनुमितिरुत्पद्य
ते तदेतत्स्वार्थानुमानं यत्तुस्वयंधूमादग्निमनुमायपरंप्रति प्रत्यर्थंपंचावयववाक्यमप्र
युज्यते तत्परार्थानुमानम् यथापर्वतोवन्हिमान् धूमवत्वात् योयोधूमवान् सोग्निमान् य
थामहानसं तथाचायंतस्मात्तथेति अनेनप्रतिपादिताल्लिंगात्परोप्यग्निंप्रतिपद्यते प्रतिज्ञा
हेतूदाहरणोपनयनिगमनानिपंचावयवाः पर्वतोवन्हिमानितिप्रतिज्ञा धूमवत्वादितिहेतुः
योयोधूमवान्सोसो वन्हिमानित्युदाहरणं तथाचायमित्युपनयः तस्मात्तथेतिनिगमनं

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्शएवकारणं तस्माल्लिंगपरामर्शोनुमानं लिंगंत्रिविधम् अन्वयव्यतिरेकिकेवलान्वयिकेवलव्यतिरेकिचेति अन्वयेनव्यतिरेकेणव्याप्तिमदन्वयव्यतिरेकि यथावन्हौसाध्येधूमवत्त्वं यत्रयत्रधूमस्तत्राग्निरित्यन्वयव्याप्तिः ह्रदमहानसादिर्दृष्टांतः अन्वयमात्रव्याप्तिकंकेवलान्वयि यथाघटोभिधेयः प्रमेयत्वात् पटवत् अत्रप्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्याप्यभिधेयत्वात् प्रमेयत्वाच्च व्यतिरेकमात्रव्याप्तिकंकेवलव्यतिरेकि यथापृथिवी इतरेभ्योभिद्यते गंधवत्वात् यदितरेभ्योनभिद्यते नतद्गंधवद्यथाजलं नचेयंतथा तस्मान्नतथेति अत्रयद्गंधवत्तदितरभिन्नमित्यन्वयदृष्टांतोनास्ति पृथिवीमात्रस्यपक्षत्वात् संदिग्धसाध्यवान्पक्षः यथाधूमवत्वेहेतौपर्वतः निश्चितसाध्यवान्सपक्षः



यथामहानसं निश्चितसाध्याभाववान्विपक्षः यथातत्रैवह्रदः सव्यभिचारविरुद्ध सत्प्रतिप

क्षासिद्धबाधिताः पंचहेत्वाभासाः सव्यभिचारोऽनैकांतिकः सत्रिविधः साधारणाऽसाधार-
णानुपसंहारिभेदात् तत्रसाध्याभाववद्वृत्तिः साधारणोऽनैकांतिकः यथापर्वतोऽग्निमान् प्र
मेयत्वात् इतिप्रमेयत्वस्यवन्ह्यभाववति ह्रदेविद्यमानत्वात् १ सर्वसपक्षव्यावृत्तोसाधार-
णः यथाशब्दोनित्यः शब्दत्वात् शब्दत्वंसर्वेभ्योनित्येभ्योव्यावृत्तं शब्दमात्रवृत्ति २ अन्वयव्य-
तिरेकदृष्टांतरहितोनुपसंहारी सयथासर्वमनित्यं प्रमेयत्वात् अत्रसर्वस्यापिपक्षत्वात् दृ-
ष्टांतोनास्ति ३ साध्याभावव्याप्तोहेतुर्विरुद्धः यथाशब्दोनित्यः कार्यत्वादिति कार्यत्वंनित्य
त्वाभावेनअनित्यत्वेनव्याप्तम् यस्यसाध्याभावसाधकंहेत्वंतरंविद्यतेससत्प्रतिपक्षः यथा-
शब्दोनित्यः श्रावणत्वात् शब्दत्ववत् शब्दोऽनित्यः कार्यत्वात् घटवत् असिद्धस्त्रिविधः
आश्रयासिद्धः स्वरूपासिद्धोव्याप्यत्वासिद्धश्चेति तत्राश्रयासिद्धोयथा गगनारविंदंसुरभि

अरविंदत्वात् सरोजारविंदवत् अत्रगगनारविंदमाश्रयःसच्चनास्त्येव १ स्वरूपासिद्धोयथा श
ब्दोगुणश्चाक्षुषत्वात् अत्रचाक्षुषत्वं शब्दे नास्तीति शब्दस्यश्रावणत्वात् २ सोपाधिको-
व्याप्यत्वासिद्धः साध्यव्यापकत्वेसतिसाधनाव्यापकत्वमुपाधित्वं साध्यसमानाधिकरणा
त्यंताभावाप्रतियोगित्वंसाध्यव्यापकत्वं साधनवन्निष्ठात्यंताभावप्रतियोगित्वंसाधनाव्या
पकत्वम् यथावह्निनाधूमेसाध्ये आर्द्रंधनसंयोगः पर्वतोधूमवान् वह्निमत्वादित्यत्रार्द्रं ध-
नसंयोगोपाधिः यत्रयत्रधूमस्तत्रार्द्रधनसंयोगोपाधिरिति साध्यव्यापकता यत्रयत्रवह्निस्त
त्रार्द्रधनसंयोगोनास्ति अयोगोलकेआर्द्रधनाभावात् एवंसाध्यव्यापकत्वेसतिसाधनाव्याप
कत्वादार्द्रन्धनसंयोगोपाधिः सोपाधिकत्वाद्वह्निमत्वम्व्याप्यत्वासिद्धम् ४ यस्यसाध्याभावः
प्रमाणांतरेणनिश्चितःसबाधितः यथावह्निरनुष्णोद्रव्यत्वादिति अत्रानुष्णत्वंहिसाध्यम् त-

दभावउष्णत्वं तत्प्रत्यक्षेनगृह्यतेइतिबाधितं व्याख्यातमनुमानं उपमितिकरणमुपमानं सं
ज्ञासंज्ञिसंबंधज्ञानमुपमितिः तत्करणंसादृश्यज्ञानं तथाहि कश्चिद्गवयशब्दार्थमजानन् कुतश्चि
दारण्यकपुरुषाद्गोसदृशोगवयपदवाच्यइतिश्रुत्वावनंगतोवाक्यार्थंस्मरन्गोसदृशंपश्यति
तदनंतरमसौगवयपदवाच्य इत्युपमितिरुत्पद्यते आप्तवाक्यंशब्दः आप्तस्तुयथार्थवक्ता
वाक्यंपदसमूहः यथागामानयेति शक्तंपदं अस्मात्पदादयमर्थोबोद्धव्यइतिईश्वरसंकेतःश
क्तिः आकांक्षायोग्यतासंनिधिश्चवाक्यार्थज्ञानेहेतुः पदस्यपदांतरव्यतिरेकप्रयुक्तान्वयान
नुभावकत्वमाकांक्षा अर्थाबाधोयोग्यता पदानामविलंबेनोच्चारणंसंनिधिः आकांक्षादिरहि-
तंवाक्यमप्रमाणम् यथागौरश्वःपुरुषोहस्तीतिनप्रमाणं आकांक्षाविरहात् अग्निनासिं-
चेदितिनप्रमाणं योग्यताविरहात् प्रहरेप्रहरेऽसहोच्चारितानिगामानयेत्यादिपदानिनप्रमा-

णं सान्निध्याभावात् वाक्यंद्विविधं वैदिकंलौकिकंचेति वैदिकमीश्वरोक्तत्वात्सर्वमेवप्रमाणं
लौकिकंत्वाप्तोक्तंप्रमाणमन्यदप्रमाणं वाक्यार्थज्ञानंशब्दज्ञानं तत्करणंशब्दः यथार्थानु-
भवोनिरूपितः अयथार्थानुभवस्त्रिविधः संशयविपर्ययतर्कभेदात् एकस्मिन्धर्मिणि
विरुद्धनानाधर्मवैशिष्ट्यज्ञानंसंशयः यथास्थाणुर्वापुरुषोवेति मिथ्याज्ञानंविपर्ययः यथाशु
क्तौरजतमिति व्याप्यारोपणव्यापकारोपस्तर्कः यदिवह्निर्नस्यात्तर्हिधूमोपिनस्यादिति स्मृ
तिरपियथार्थाऽयथार्था प्रमाजन्यायथार्था अप्रमाजन्या अयथार्था सर्वेषामनुकूलवेदनी-
यंसुखम् प्रतिकूलवेदनीयंदुःखं इच्छाकामः क्रोधोद्वेषः कृतिःप्रयत्नः विहितकर्मजन्योध-
र्मः निषिद्धकर्मजन्यस्त्वधर्मः बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः बुद्धीच्छाप्रयत्नानित्या
ऽनित्याश्च नित्याईश्वरस्य अनित्याजीवस्य संस्कारस्त्रिविधः वेगोभावनास्थितिस्थापक- ७

श्च वेगाख्यःपृथिव्यादिचतुष्टयमनोवृत्तिः अनुभवजन्यास्मृतिहेतुर्भावना आत्ममात्रवृ
त्तिः अन्यथाकृतस्यपुनस्तदवस्थापादकःस्थितिस्थापकश्च कटादिपृथिवीवृत्तिः चल
नात्मकं कर्मऊर्ध्वदेशसंयोगहेतुः उत्क्षेपणं अधोदेशसंयोगहेतुरपक्षेपणं शरीरसन्निकृ-
ष्टसंयोगहेतुराकुंचनं शरीरविप्रकृष्टसंयोगहेतुःप्रसारणं अन्यत्सर्वंगमनमेव नित्यमेक
मनेकानुगतम् सामान्यं द्रव्यगुणकर्मवृत्ति परंसत्ता अपरं द्रव्यत्वादि नित्यद्रव्यवृ-
त्तयोव्यावर्तकाविशेषाः नित्यसंबंधःसमवायः अयुतसिद्धवृत्तिः ययोर्मध्ये एकमपरा-
श्रितमेवावतिष्ठते तावयुतसिद्धौ यथावयवावयविनौ गुणगुणिनौ क्रियाक्रियावंतौ
जातिव्यक्तीविशेषनित्यद्रव्येचेति अनादिःसांतःप्रागभावः उत्पत्तेःपूर्वंकार्यस्य सादिर
नंतःप्रध्वंसःउत्पत्त्यनंतरंकार्यस्य त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोत्यंताभावः

त॰ ८ यथाभूतलेघटोनास्तिइति तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः यथाघ- सं॰
टःपटोनभवतीति सर्वेषामेवपदार्थानांयथायथमुक्तेष्वेवांतर्भावात् सप्तैवपदार्थाइतिसि
द्धम् कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये॥अन्नंभटेनविदुषारचितस्तर्कसंग्रहः॥१॥
॥ ॥इतिश्रीअन्नंभट्टेनविरचितस्तर्कसंग्रहःसमाप्तिंप्राप्तः॥ ॥छ॥ ॥
॥शुभंस्यात्॥ ॥छ॥ ॥छ॥ ॥छ॥ छ

॥ इदंतर्कसंग्रहपुस्तकं मुंबापुर्यां ग्रंथप्रकाशकाख्यशिलायंत्रे मुद्रितं॥ ॥ श्री॥ श्री

शके १७८२ रौद्रनामसंवत्सरे मार्गशीर्षमासे कृष्णपक्षे द्वादश्यां भौमे समाप्तं॥ ॥ श्री॥ ॥

इतितर्कसंग्रहःसमाप्तोयं